श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

॥ श्रीविट्ठलविंशतिः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्रीविट्ठलविंशतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

इष्टका भगवती सरस्वती
सांप्रतं भवतु साऽञ्जने मम।
इष्टकाश्रयशुभस्वविग्रहं
विट्ठलं विमलमीरितुं यते॥ 1॥

इष्टकापदि परस्स्वयं पुमान्
चन्द्रभागभवदश्वकन्धरः।
इष्टकापदिह पण्डरीपुरे
सांप्रतं जयति चन्द्रभागया॥ 2॥

श्री विट्ठलं नीलसरोजकान्तिं
श्रीचन्द्रभाऽगादवलोकयन्ती।
अत्रैव नित्यं स्थितिमादधाना
श्रीचन्द्रभागेति नदी बभूव॥ 3॥

श्रीचन्द्रमध्यस्थितमत्र कृष्णं
सक्तं पृथिव्यामवलोक्य युक्तम्।
श्रीचन्द्रभा सा समुपागताऽत्र
श्रीचन्द्रभागेति नदी बभूव॥ 4॥

भीमात्मनो यातुगणस्य हन्ता
भीमाग्रजातेन नुतो य आसीत्।
भीमानुजातस्य रथस्य यन्ता
भीमातटे संप्रति राजते सः॥ 5॥

भीष्मस्य माता सरिदेव सोयं
भीमा भवव्याजदवानलस्य।
भीमानुजप्रेयसि जातकामा
भीमाभिधाना वहतीह रम्या॥ 6॥

इष्टका चन्द्रभा चन्द्रमा विठ्ठलः
चन्द्रभागा ततस्तद्पदालंबिनी।
चन्द्रभागाभिधा सर्वदा सन्निधिं
संविधायात्र सा सत्सरित् क्रीडति॥ 7॥

पुण्डरीकवदहो नयनं ते
पुण्डरीकनयनं तदुशन्ति।
पुण्डरीकसुजने नयनं ते
पुण्डरीकनयनोऽसि वस्तुतः॥ 8॥

तपसां तत्परमुत्तमं तपः
पितुराराधनमित्यवैम्यहम्।
पितृशुश्रूषुवरस्य दर्शने
स भवानिष्टकया तपस्यति॥ 9॥

उद्गता विनिहिता पदाम्बुजे
तावके जयति देवकीसुत।
इष्टकानि ददती नतात्मनां
पुण्डरीककरसङ्गकोमला॥ 10॥

नाम्बुजे न मुनिनाथमानसे
नाऽपि नन्दभवने न मातरि।
तिष्ठतीह यदिहेष्टकातले
पुण्डरीककलिते कृतादरः॥ **11**॥

इष्टका रुक्मिणी पण्डरी नायक !
श्रीपदाम्भोजसन्धारिणी साऽऽगता।
इष्टकारूपिणी राजते निश्चितं
यां समास्थापयश्श्रीयुतो भासते॥ **12**॥

इष्टकास्ताः पराः काठके पाठिता
आनयन् सश्रमो मानवो नो भवेत्।
इष्टकां मत्पदैकाश्रयां पूजयन्
इष्टकामाप्तिमानस्तु भूभूषणम्॥ **13**॥

इत्यसौ विठ्ठलश्श्रीदयाचोदितः
पण्डरीपत्तने पुण्डरीकार्चितः।
इष्टकां काञ्चन श्रीमतीमाश्रित -
श्चन्द्रभागान्तिके चारु संशोभते॥ **14**॥

इष्टकाननमुशन्ति राघवं
त्वाममी बुधवराः पितुर्गिरा।
इष्टकापदमिहाथ यादवं
पूजकस्य महतः पितुर्गिरम्॥ **15**॥

इष्टकापथजनानुषङ्गतः
पापमागतमपोहितुं परम्।
इष्टकापदमिहाऽऽनतः प्रभुं
विठ्ठलं भज विमोक्ष्यसे ततः॥ **16**॥

इष्टका जगति सर्वतो जनाः
कष्टकालवशगा दधत्यघम्।
इष्टकापदममुं विनम्य ते
स्पष्टका भुवि भवन्तु शोभनाः॥ 17॥

राधावक्रानन्तवाग्विभ्रमाढ्यं
वश्यं कृत्वा स्वै रसैर्मार्गमध्ये।
रोधोवक्रा चन्द्रभागास्वभूमा
कृष्णाश्लिष्टा गाहतेऽसौ रसान्तः॥ 18॥

चन्द्रं त्वं मनसाऽसृजः किल पुरा तस्याऽथ भा विट्ठल !
सा चाग्रे सुभगाऽऽपगा प्रवहति श्रीचन्द्रभागाभिधा।
पापस्थाक्षरमप्यहो ! न सहते पुण्यस्वरूपा यतः
तस्मात् पेन विना जनैस्समुदिता श्रीचन्द्रभागेति सा॥ 19॥

अष्टदिक्षु श्रुतादष्टनारीश्वरा -
दष्टभूतिप्रदादष्टमीसंभवात्।
अष्टमूर्त्यानतादष्टवर्णेडिता -
दिष्टकावस्थितादिष्टमन्यन्न मे॥ 20॥

पण्डर्पूरिति नामधेयमहिते दिव्यस्स्थले क्रीडतः
वैदर्भीसहितस्य यादवमणेस्सौम्येष्टकावर्तिनः।
कन्दर्पस्य पितुस्स्तवोऽयमुदितः श्रीश्रीनिधेर्वाङ्निधे -
र्वैदर्भीशुभरीतिमान् विजयते सर्वेष्टकामप्रदः॥ 21॥

॥ इति श्रीविट्ठलविंशतिः समाप्ता॥